छां॰भा॰टी॰ स्मरणस्य भूयस्त्वमनुभवानुस्मारेण साधयति दृश्यते हीति हिशब्दार्थो यस्मादित्युक्तः स्मरणाभावे श्रवणाद्यभावं व्यतिरेकमुक्त्वा

२८ दृश्यते हि लोके स्मरणस्य भूयस्त्वं यस्मात्तस्माद्यपि समुदिता बहव एकस्मिन्नासीनोऽन्यपविशेयुस्तेन तत्रासीना अन्योन्य

14 भाषितमपि न स्मरन्तश्चेत्स्युः नैव ते किंचन शब्दं शृणुयुस्तथा न मन्वीरन्मन्तव्यं चेत्स्मरेयुस्तदा मन्वीरन् स्मरणाभावत्वान्न

तस्माद्यपि बहव आसीरन्न स्मरन्तो नैव ते कंचन शृणुयुर्न मन्वीरन्न विजानीरन्यदा वाव ते स्मरेयुरथ शृणुयुरथ

मन्वीरन्नथ विजानीरन्स्मरेण वै पुत्रान्विजानाति स्मरेण पशून्स स्मरमुपास्स्वेति स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्म

रस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽस्ति भगवः स्मराद्भूय इति स्मराद्वाव भूयोऽस्तीति तन्मे भग

वान्ब्रवीत्विति १२ आशा वाव स्मराद्भूयसी।

मन्वीरन्न तथा न विजानीरन्यदा वाव ते स्मरेयुर्मन्तव्यं विज्ञातव्यं श्रोतव्यं वा अथ शृणुयुरथ मन्वीरन्नथ विजानीरन्न तथा स्मरे

ण वै मम पुत्रा एत इति पुत्रान्विजानाति स्मरेण पशून् अतो भूयस्त्वात्स्मरणमुपास्स्वेति उक्तार्थमन्यत् १३ आशा वाव स्मराद्भू

यसी अप्राप्तवस्त्वाकांक्षा आशा तृष्णा काम इति यामाहुः पर्यायैः सा च स्मराद्भूयसी ऽऽ तद्भावे तद्भावमन्वयमाह यदेति। राम:

इतश्चास्ति स्मरणस्य भूयस्त्वमित्याह तथेति तद्भूयस्त्वे फलितमाह स्मरेति ॥ ॥ ॥ ॥ २८

आशा वाव स्मराद्भूयसी आकांक्षा तृष्णाप्राप्तवस्तुविषया कथमित्याहुःना १४

कथमाशयाह्वानं स्मरतस्तया स्मरति स्मर्तव्यं आशा । विषयरूपं स्मरन्नसौ स्वकामो भवसि आशेद्धः आशयाभिवर्द्धितः स्मरन्नतः स्म
रन्नृगादीन्मंत्रानधीतेऽधीत्य च तदर्थं ब्राह्मणेभ्योऽविधीश्च श्रुत्वा कर्माणि कुरुते तत्फलाशयैव पुत्रांश्च पशूंश्च कर्मफलभूता
नानिच्छतेऽभिवाञ्छति आशयैव तत्साधनान्यनुतिष्ठन्निमं च लोकमाशेद्ध एव स्मरन्लोकसंगमहेतुभिरिच्छन्नमुं च लोकं अतः

आशेद्धो वै स्मरो मंत्रानधीते कर्माणि कुरुते पुत्रांश्च पशूंश्चेच्छत इमं च लोकममुं चेच्छत आशामुपास्स्वेति स य आशां
ब्रह्मेत्युपास्ते आशयास्य सर्वे कामाः समृध्यन्त्यमोघा हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथा कामचारो भ
वति य आशां ब्रह्मेत्युपास्तेऽस्ति भगव आशाया भूय इति प्राणो वाव आशाया भूयानिति तन्मे भ
गवान्ब्रवीत्विति
शेद्धः स्मरन्नतः साधनान्यनुष्ठानेनेच्छतेऽआशारसनावद्धः स्मराकाशादिनामपर्यन्तं जगच्चक्रीभूतं प्रतिप्राणि अतः आशायाः स्म
रादपि भूयस्त्वमित्यत आशामुपास्स्व यस्त्वाशां ब्रह्मेत्युपास्ते शृणु तस्य फलं आशयास्य उपासितुः सर्वे कामाः
समृध्यन्ति समृद्धिं गच्छन्ति अमोघा हास्याशिषः प्रार्थनाः सर्वा भवन्ति यत्प्रार्थितं सर्वं तद्भवत्यवश्यं भवतीत्यर्थः यावदाशायागतमित्या
दि पूर्ववत् १४ ॥

प्राणस्यसर्वास्पदत्वेनभूयस्त्वंकथयति नाभोपचक्रमर्पमिति प्रश्नस्तस्मिन्वायतरुपचक्रमेयस्य जगतोस्तितनया पारचक्रमनेवा
११ स्त्रिमाशेवानेयस्याप्तिनजगतश्चेतिविग्रहः कार्यकारणत्वंकाचित्कमुपादानोपादेयत्वंनिमित्तनैमित्तिकत्वमपिक्वाचित्क
15 मेव उतएतेरभूयस्त्वपार्पूर्वस्मात्पूर्वस्मान्नामादेरुत्तरोत्तरवामादेर्भूयस्त्वेनेतिपावत् स्मृतिनिमित्तःसम्भवोपरपनतयाप्राणा
विशेषानापाशेः सर्वतोविपाशितमित्यत्रदृष्टांतमाह वितनिमवैन विसशङ्केत णालेविषपः यद्योक्तंजगत्प्रस्मिन्नर्पितंस

नाभौचक्रमनाशीने कार्यकारणत्वेननिमित्तनैमित्तिकत्वेन चोतऐतरभूयस्त्वपावस्थितंस्मृतिनिमित्तसम्भवमाशाराश
नापशैविपाशितंसर्वेसर्वतोविततमिवतंतुभिर्यस्मिन्प्राणेसमर्पितंयेन चसर्वेनोव्यापिनाभ्यंतर्वहिर्गतेनसूत्रेणप्राण

प्राणोवाआशायाभूयान्यथावाअरानाभौसमर्पिताएवमस्मिन्प्राणे ॥ ११ ॥

णारवस्त्रेरागत्थितेविधृतंचएषप्राणोवैआशायाभूयानकथमस्यभूयस्त्वमित्याहदृष्टांतेनसमर्थयंस्तत्भूयस्त्वंयथा
वैलौकेरथचक्रस्याराएवनाभौसमर्पिताः संप्रवेशिताः एतेनेदृवमस्मिन्लिंगसंघातरूपेप्राणेप्रज्ञात्मनिदेहिकेमुख्ये ॥
एषभूपान्निसंबंधः सर्वस्यजगतस्तस्मिन्नर्पितत्वमेवदृष्टांतद्वारणस्पष्टयति येनचेतिसर्वतोव्यापिनेतस्यैवस्फुटीकरणमं
तर्वहिर्गतेनेति प्राणस्याशायाःसकाशाद्भूयस्त्वमाक्षुस्यपूर्वकंसमर्थयते कथमित्यादिनालिंगात्मसंघातःसमुदाय
त्तरूपेसमष्ट्यात्मनीतिपावत्उपाधितद्नोरमभिमतविशिनष्टिप्रज्ञात्मनीति तस्यैवाध्यात्ममाधिदैवंचावस्थानेनस्य ११

चपमिदंहिकरोति प्राणान्रक्षावनयति सुखकरोति यथो
क्तेऽस्मिन्प्राणेसर्वसमर्पितमित्युत्तरत्रसंबंधः ॥ ॥

प्रत्यगात्मनो निरुपाधिकत्वं प्राणस्योक्तं न तूपपादयति यस्मिन्निति तस्मिन्सर्वं समर्पितमिति पूर्ववत्संबंधः किमिति चक्षुरादिष्वविद्य
मानेष्वपि मुख्यस्यैव प्राणस्य परमात्मोपाधिकत्वमुपगतमित्याशंक्याशंक्य वाह पश्येति घ्राणस्येश्वरं प्रति सर्वाधिकारत्वे श्रुतेनंतरं प्रमाणाच
ति कस्मिन्निति ईश्वरं प्रति प्राणस्यैवोपाधिकत्वे हेत्वंतरमाह यत्त्विति अत्रापि पूर्ववदुत्क्रमणाः छायावदीश्वरमनुगच्छतीत्यत्र
श्रुतेनंतरं प्रमाणयति तथेति भूतमात्राः शब्दादयः पृथिव्यादयश्च विषयाः प्रज्ञामात्राश्चक्षुराद्यादिश्वेदिषु तज्ज्ञानकेद्रियेषु वे सर्वथम

यस्मिन्परदेवतानामरूपव्याकरणाय प्रादुर्भावेर्मीति विषयश्च जीवेनात्मनानुप्रविश्य पश्य महाराजस्यैव सर्वाधिकारीश्वरास्य कस्मि
न्वहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुतेः यत्तु छायेवानुगतमीश्वरं तथ

सर्व एतत्समर्पितं प्राणः प्राणेन याति ॥११॥

यस्मादेषु नेमिरर्पिता नाभावराश्चार्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञा
त्मेति कौषीतकीनामन्त एवमस्मिन्प्राणे सर्वं यथोक्तं समर्पितं अन्तः स एष प्राणोऽपरतंत्रः प्राणेन स्वशक्त्यैव याति नान्यकृतं गमनादि हि क्रि
यास्वस्य सामर्थ्यमित्यर्थः ऽऽ वस्तुना सां प्राणोऽर्पितत्वेन यापि क्रियं प्राणस्य छायावदीश्वरं प्रत्यनुगतिस्तत्राह स एष इति कौषीतकीनां श्रु
तिरिति शेषः प्राणस्य यथोक्तविशेषणविशिष्टस्य भूतशब्दोपयः व्याख्यानं भागमनस्थावशिष्टमंशं व्याकरोति एवमिति प्राणः प्राणेन याती
त्यस्यार्थमाह अन्तरिति सर्वं स्पष्टत्वादिति यावत् ॥

छां॰ भा॰ टी॰ प्राणः प्राणेन यातीत्यादेः प्राणो ह्येवैतानि सर्वाणि भूतानीत्यंतेन स्वतात्पर्यार्थं संक्षिप्य कथयति सर्वमिति निदर्शनं हि यस्य संप्रसारणस्य
च प्राणाभिन्नत्वं प्रकटयति प्राणा इति तद्व्याख्यानं हि यमानमुच्यते तस्य संप्रदानस्य च प्राणाभिन्नत्वात्प्राणेषु तेषु तत्प्राणस्य सर्वा
१६ त्मत्वमतः शब्दार्थः प्रसिद्धिरनीतिकरणी पितृत्वादिकं तेनार्थमिति अन्वयव्यतिरेकाभ्यां पित्रादिशब्दानां प्राणविषयत्वान्न प्रसि

16 संबंधिक्रियाकारकफलभेदजातं प्राणे एव न प्राणाद्व्यतिरिक्तमस्तीति प्रकरणार्थः प्राणः प्राणं ददातीति पदद्वयनिरत्यात्मभूत
मेव यस्मै ददातीति तदपि प्राण एवेत्यर्थः पित्राद्याख्योऽपि प्राण एवेत्याह पित्रादिशब्दानां प्रसिद्धार्थत्यागेन प्राणविषय

प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्म
णः स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाचार्यं वा ब्राह्मणं वा किंचिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः

त्वमसीत्युक्तेनेत्यनेनापि पित्रादिषु पित्रादिशब्दप्रयोगात् तद्धन्तो च प्रयोगाभावात् कथं तर्हि तस्मात् स यः कश्चिदसि चाशोभना
मान्यतमं यदिदं भृशमिव वदनं ननु रूपमिव किंचिद्वचनं त्वंकारादियुक्तं प्रत्याह तमेनं पार्श्वस्थाः आहुर्विवेकिनो धिक्त्वास्तु धि
गस्तु त्वामित्येवं ऽऽऽ रामः
हिंसकत्वं घनमित्याह उत्यतरति अन्वयव्यतिरेकाभ्यामेवमर्थं प्रकटयति अथेत्यादिना पित्रादिषु प्राणेन १६
न्ति पित्रादिशब्दानां प्रयुज्यमानत्वमन्यथा चाप्रयुज्यमानत्वमित्युच्यते त्वंकारादियुक्तमित्यादि पदेनोतस्कारप्रभेदो गृह्यते ॥

पित्रादिषु प्राणप्रवाहितं प्राणिविवेकिनोधिक्कारवचने हेतुमाह पितृहेति सोहमाणो पित्रादिषु पित्रादिशब्दानां प्रयुज्यमानानत्वमिस्तन्व

पप्रुत्वादिनिरेकमाह अथेनानेवेति समस्तव्यंजोहतस्वप्तस्त्वावपवानिभ ज्येत्यर्थः पध्यो सुपत्कमाह वमयोसिनन यायो स्वरिन्न

पद्धपत्वं नरे वानिचारकमीविशेषबिषसमासेति अवयवविभजनमाह शब्दार्थे नहूहसंवहूमिस्तत्र न छन्दः कुर्वपि त्यादिवि

पितृहा वै त्वं पितुं हेतेसाहि अथैनाने वोत्क्रांतप्राणां स्तान्हे हनात्यन्ध यपि शूलेन समासं समस्य व्यतिषं दहे नस्मस्मासं

दहेदेवमतिक्रूरमपि कर्म समासव्यासाहिमकारेण हनलस्पाणं न हे हसंवडूमेवकुर्वाणं नैवेनं ब्रूयुः पितृहेत्यादि तस्माद्

पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्याचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति स

यथापि यद्यप्येनानुत्क्रांतप्राणाञ्छूलेन समासं व्यतिषंदहेन्नैवैनं ब्रूयुः पितृहासीति न मातृहासीति न भ्रातृहासीति

न स्वसृहासीति नाचार्यहासीति न ब्राह्मणहासीति प्राणो ह्येवैतानि सर्वाणि भवति स वा एषः

निरेकाभ्यामवगम्यते एनत्सि चायारखोपि प्राण एवेति तस्मात्प्राणो ह्येवैतानि पित्रादीनि सर्वाणि भवति चलानि स्थिराणि

च स वा एष प्राणविता॥ १॥ विषयः यद्यपि समस्त प्राणो अ शिष्टेषु पित्रादिशब्देषु स्वतया पिना सो सुख्यस्तानिहूषपे कूरकर्मानुष्ठानेपि

शिष्टगर्हाः इत्येरितिभाकू अथानुपपत्तिरेव फलमुपसंहरति तस्मादिति प्राणस्यैव पित्रादि संतकृत्वेकिंस्यादित्याशंक्याह त

स्मात्प्राणो हीनि प्राणमभ्यपत्त्वमित्यनुसाधनहिज्ञानफलमाह स वा इति प्राणविदतिवादी भवतीति संबंधः ७ ७

छां॰भा॰टी॰ कृपणानि विलपामि अपेक्षापामह एवमिति सर्वात्मत्वप्रयोतमकारः फलतोऽनुभवः स्वरूपत्वेन साक्षात्कारः तद्दनुदर्शनेनैव प्रा
१० णविततेसिद्धेनिकिमिति मननविज्ञाने पृथगुपन्यस्येते तत्राह मननविज्ञानाभ्यां हीति उक्तानुपपत्तिनिराकरणोपपत्तिसहकृ
17 एवं पश्यन्नित्यप्रकारेण पश्यन्फलतोऽनुभवन्नेवं मन्वान उपपत्तिभिश्चिन्तयन्नेवं विजानन्नुपपत्तिभिः संयोज्यैवमेवेति निश्च
यं कुर्वन्नित्यर्थः मननविज्ञानाभ्यां हि संस्कृतः शास्त्रार्थो निश्चितो दृष्टो भवेदिति एवं पश्यन्नतिवादी भवति नामाद्याशान्तमः
तीत्य वदनशीलो भवतीत्यर्थः तं चेद्ब्रूयुस्ते यदि एवमतिवादिनं सर्वं ह्यासर्वशब्देन नामाद्याशान्तमतीत्य वर्त्तमानं प्राणमेव

एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रू
यु रतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत २५

वदतस्त्वेवं पश्यन्तमतिवदनशीलमतिवादिनं ब्रह्मा हि त्वं भय पर्यन्तस्य हि जगतः प्राणमात्मानमहमिति ब्रुवाणं परिब्रूयुरतिवा
द्यसीति वा त्वमतिवाद्यस्मीति ब्रूयात् नापह्नुवीत कस्माद्ध्यसावपह्नुवीत प्राणं सर्वेश्वरमपमस्मात्मत्वेनोपगत १५ हरिः
ता ह्यात्मा घस्माणि विषये ज्ञानं जायते तत्र हि विज्ञानोविवस्यते तत्फलसाक्षात्कारणं दर्शनं मिति भेदः मननविज्ञाने विना दर्शना एम: ८०
संभवोऽनः शब्दार्थः सर्वं मननादि द्वारेणेति यावात् अतिवादित्वेनुक्तान्हयति नामादीति नापह्नुवीत सुतं व्यक्तो करोति कस्मा

यद्यस्मात्पृथिव्यादिनाम्नान्त्वेन सर्वैश्वर्यमारोपोऽस्मीत्युपगतवांस्तस्मादपह्नवे हेत्वभावाद्धास्मिन्नोऽतिवाद्यस्मीत्येनापह्नुवीतेत्यत्र प्राणोऽन्त
सुपदेशं श्रुत्वा नारदस्तत्स्नीभावे किं कारणमिति साशङ्कायामाह स एष इति कथं तस्यापि निरवगमे साशंक्याह न पूर्ववदिति निवि
मित्तं तर्हि मामायापानुपेक्ष्यापोस्वयमेवाचार्यो व्युत्पादयतीत्याशंक्याह तमेवमिति एतस्माज्जायते प्राण इति श्रुतेः स तस्मात्

स एष नारदः सर्वातिशयं प्राणमात्मानं सर्वात्मानं श्रुत्वा नातः परमस्तीत्युपरराम न पूर्ववत्किमस्ति भगवः प्राणाद्भूय इति पर
[illegible]म प्रश्नः तमेवं विकारानृतब्रह्मविज्ञानेन परितुष्टमकृतार्थं परमार्थसत्यातिवादिनमात्मानं मन्यमानं योग्यं
शिष्यं मिथ्याग्रहविशेषाद्विमोचयन्नाह भगवान्सनत्कुमारः एष तु वा अतिवदति यमहं वक्ष्यामि न प्राणविदतीति वा

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति ॥ १ ॥

दी परमार्थतः नामाद्यपेक्षं तु तस्यातिवादित्वं प्राणस्तु भूमाख्यसर्वान्तिकोऽनन्तत्वं परमार्थसत्यं वेद सोऽतिवादी अस्मात् अवाह एष
तु वा अतिवदति यः सत्येन परमार्थसत्यविज्ञानवत्तयाऽतिवदति सोऽहं त्वां प्रपन्नो भगवन्सत्येनातिवदानि ऽऽ अयथाविकारत्वे
नानृतत्वे वाचारम्भणे विकारे नामधेयमित्युक्ते तस्मिन्ननृते प्राणे ब्रह्मणि विज्ञानेनेतावत परितुष्टत्वे कथमकृतार्थत्वमि
त्याशंक्य मिथ्याज्ञानशालित्वादित्याह परमार्थेति न च तस्योपेक्षा केन्तु मित्याह योग्यमिति मिथ्याग्रहविशेषः नास्ति प्राणात्प
रमित्यभिमानः कथं तर्हि प्राणविदोऽतिवादित्वमुक्तमत आह नामादीति कस्तर्हि परमार्थतोऽतिवादीत्याशंक्याह यस्त्वतिसोति

छां॰भा॰टी॰ ननु नारदस्य नामाद्युपास्तिविज्ञानमुपसन्नं कथं सत्येनातिवदानीतीच्छ तत्राह तथेति यदा वै विजानातीत्यादिवाक्यं व्याख्या-
१८ वेनुत्तरमाह यदेति यदि विमृश्य सद्रूपादनुगतादभिन्नमसदेव स्यादिति त्वभिप्रेत्य सन्मात्रमेव परमार्थसत्यमिति सिद्धं हीति परमार्थतः
18 सत्यं यदैव विजानातीत्यर्थः विज्ञानप्रकारमभिनयति इदमिति ततस्तदाऽनृतं विकारजातं हित्वा सदेव सत्यमिति मत्वा यद्द्र-
तथा मां प्रति च ननु भगवान्यथाहं सत्येनातिवदानीत्यभिप्रायोऽपि एवं सत्येनातिवदितुमिच्छसि सत्यमेव तु तावद्विजिज्ञा-
सितव्यमित्युक्तमाह नारदः तथास्तु नहि सत्यं भगवो विजिज्ञासे विशेषेण ज्ञातुमिच्छे यत्नतोऽहमिति यदा वै सत्यं पर-
मार्थतो विजानाति इदं परमार्थतः सत्यमिति ततोऽनृतं विकारजातं वाचारम्भणं हित्वा सर्वविकारावस्थं सदेवैकं सत्य-
॰ सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति यदा वै विजानात्यथ सत्यं वदति ॥ ॥
मिति तदैवाद्य वदतीत्यर्थः ननु विकारोऽपि सत्यमेव नामरूपे सत्यं तावत्प्राणा वै सत्यं तेषामेष स-
त्यमिति श्रुत्युक्तत्वात् सत्यमुक्तं सत्यं त्वेव श्रुत्यन्तरोदितविकारस्य न परमार्थापेक्षया मुक्तेः इत्यनतिवदतीति योजना सद्विज्ञानस्य
तदृदत्वं निश्चित्यातिवादित्वं घोतनार्थोऽयशक्यः श्रुतेनैव एवं भेदाभेदवादी शंकते नन्विति किं चरमाद्यारम्भकश्रुत्या विकारस्य सत्यत्व- रामः
मुक्तमिति एतावन्मात्रमुच्यते किंवा परमार्थसत्यत्वमिति विकल्प्याद्यमङ्गीकारोति तत्त्वमिति द्वितीयं दूषयति नेति भेदाभे- १८
दयोर्विरोधादेकोपाधावयोगाद्धि कारस्य चाज्ञानपर्वकल्पप्रत्यनुमानादस्तेन्ताबाध्यत्वाभिप्रायेणास्य समन्त्वमुक्तं नाणी वो तामि

कथं तर्हि भगवता हि सुतस्तवमुक्तमिमांशं कांगीकारं स्फोपयति । किं तर्हीति शङ्कितजनितस्तद्दृष्टिविषयत्वापेक्षं भगवता तत्र पंसहि सुच्यते
नद्विषयत्वापेक्षं भगवता हि पंसांसारिनिरु गहिपतेन यथा च भगवता पंच कंसस्कन्धानद्धेसि स्रुत्रा यद सत्ता मि ति पर्यायोक्तं । तथा तद्दृष्टोऽज्ञभ्रमपो
नीमरपपोसत्तद्धात्मकत्वात्स्कन्धभावानां सत्ता वेगावहारिकमित्यर्थः । तत्स्वभावानादिश्रुमिथ्याभवनेषपितत्वाश्रु निरावितुं सा हत
द्वारेणेति भगवतोऽनेकां सांव्यवहारिकसत्यत्वाद्युपादानद्वारेण भगवता पायवाधिपत्य परमार्थसत्यसप्रबन्धनोपदेशनिर्दिष्टं सिद्धेति

किं तर्हि दृष्टिविषयाविषयत्वापेक्षं संवृतिसत्यं चेति सत्यमिमुक्तं तद्द्वारेण च परमार्थसत्यमसो प्रत्यक्षधिर्विविक्षितोति मागता
वैस मेनेषामेषसत्यमिति चोक्तं । शास्त्र पितापुत्रसमेव कनु भगवता विषयान् परमार्थसत्यविज्ञानाभिज्ञानाभिमानात् बु
नाविजानन्ति संवदन्ति ॥

त्यादपनारां पतस्ते वसमपरमार्थतो भवमास्यन्तहि तापयिष्यामीसेषाविशेषतो विगतसितोर्थः नाविजानन्तसंवदन्ति ॥ ५

तत्वाने ख्यापसत्यप्रधानस्वरेणऽवगमितोविवक्षितेनेति तत्वाते ख्यापिसत्यत्वस्मृ निरविश्रुद्धेऽर्थ पयो नोर्थीविवक्षितोऽहहारा कस्तु
नाविस्तत्तगमकमाह । भगवतावदति ननु मृत्युनं नश्वरविकारस्यापि व्यावहारिकत्वं सत्यत्वामिष्टं महात्मेनेतु ननोरेष्यतभूत्वाएव सत्यत्वांगी
कारेणनु तथा चविरोधमात्र वस्क्षामन्तव्याह । सापीति परिनामस्यापि व्यवहारत । सत्यत्वमुपगत किं तर्हि सत्यत्वमारस्पवि
नहितमिस्रांश्याह । हन्तीति पश्ये ज्ञानानेयसंवरनीति पश्चाद्व्याख्यानं नरस्वपरमीरिक भ्यास्कुरपत्राहिरोस्तिरक माह ना

छां॰भा॰टी॰ परमार्थसत्यमविजानन्नपि वदति सत्यमाद्यो नो न्याशंक्याह यदीत्विति नहि कायं संदेवपरमार्थसत्यमिति वदतोऽभीष्टसिद्धिरित्याशंक्याह न
त्विति नाम्नेव जीवेश्वरपारिणामरूपावि घंतेनेत्याह नयेति मतो स्वनाम्नि सत्यवादित्वेविकं त्वसत्यवादित्वमेवेत्युपसंहरति सत्यं तर
ति व्यतिरेकं दृष्टांतत्वाद् अपमाचष्टे विजानन्नेवेति अस्तु तर्हि सत्यविज्ञानपूर्वकमति वादित्वमित्याशंक्याह न चेति यथैवं जिज्ञा
19

सत्त्वविजानन्वदतीति सोऽग्न्यादिशब्देनाग्न्यादीन्परमार्थसद्रूपान्मन्यमानो वदतीत्यनुज्ञेयरूपत्रयव्यतिरेकेण परमार्थतः संति
तथा तान्यपि रूपाणि सद्रूपेण यानि वस्तुनि स मतो नाविजानन्सत्यं वदतीति विजानन्नेव सत्यं वदतीति न च तत्सत्यविज्ञान

विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति १७ यदा वै मनुतेऽथ
विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति १८ य
दा वै श्रद्दधात्यथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति १९

मविजिज्ञासितमप्रार्थितं ज्ञातुं तस्याह विज्ञानं त्वेव विजिज्ञासितव्यमपूर्वं विज्ञानं भगवो विजिज्ञास इति एवं सत्यादीनां चोत्तरोत्त
रोत्तरकारणं तानां पूर्वपूर्वस्मिन्नुक्तं व्याख्येयं यदा वै मनुत इति मतिर्मननं तर्को मंतव्यविषय आदरः १८ श्रद्धास्तिकबुद्धिः श्रद्धा १९ एम:
सा हानागतस्य विज्ञानं ज्ञेयमिति निश्चयात्मकं चेति तदर्थः सत्यवदनं प्रति सत्यविज्ञानस्य यथा कारणत्वमुक्तं तथा पूर्वस्य पूर्वस्योत्तर १९
मुत्तरकारणत्वेन दृष्टव्यमित्यभिनिर्दिशति एवमिति १७ विज्ञानकारणीभूतां मतिं व्याचष्टे मतिरिति मननहेतुभूता श्रद्धा वा

श्रद्धाहेतुं निष्ठां व्याचष्टे निष्ठेति २० निष्ठा निष्ठानं हेतुं निर्विभजते कृतिरिति कथं पुनरेषामुत्तरोत्तरपूर्वस्य पूर्वस्य कारणो भवतीत्यत्रा-
ह नसांहोति २१ कृतिस्तर्हि कुतो भवतीत्यत आह सापीति यदा सुखं लभतेऽत सा भवतीति संबंधः ननु सुखलाभस्यैंद्रियपर्सयमाहि-
त्यानिरेकेण भावात्कथं सुखलाभाधीना कृतिरित्यत आह सुखमिति वक्ष्यमाणं सुखं लब्ध्वा नामैव नाहैव पर्य्योत कारिति : सि

निष्ठा गुरुशुश्रूषादितत्परत्वं ब्रह्मविज्ञानाय २० यदा वै करोतीति कृतिरिंद्रियसंयमः चित्तैकाग्र्यताकरणं च मनसो निःसां निष्ठा
हो निष्पद्यात्ता निसंभवति विज्ञानावसानानि २१ सापि कृतिर्यदा सुखं लभते सुखं निरतिशयं वक्ष्यमाणं लब्धं मयेति

यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठं छ्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां
भगवो विजिज्ञास इति २० यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासि-
तव्येति कृतिं भगवो विजिज्ञास इति २१ यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति ७

मन्यते तदा भवतीत्यर्थः यथा दृष्टफलं सुखात्कृतिस्तथेहापि नासुखं लब्ध्वा करोति भविष्यदपि फलं लब्धमेव मत्वा नेनेतदुद्दिश्य
प्रवृत्त्युपपत्तेः ३ इत्यर्थः सुखं लब्ध्वा करोतीत्येतद्दृष्टान्तेन साधयति यथेति दृष्टं फलं यत्र यथा कृत्यन्न सुखो देहेषु वैकाल्यो-
केनिर्दृष्टान्तयात्मन्यपि सुखं लब्ध्वैव करोतीति न सुखं विना तदुद्देशेनेत्यर्थः नन्विंद्रियाणां मनसश्च संयमपूर्वकं सुखं भवतीति तथा च क-
थमनुलब्ध्वा करोतीत्युच्यते तत्राह भविष्यदपीति ॥

छां॰ भा॰ टी॰ ३ इत्यर्थं यमांकांक्षा सर्वं कसुख्यापयति अथेत्यादिना २२ भूम्नोऽर्वागपि वैषयिकं सुखमस्तीत्याशंक्याह नाल्पेऽवांगिति कथमल्पे

२० पि सुखत्वेनार्पितत्वान्नाह अल्पस्येति दुःखरूपान्तस्यात्र सत्यस्य सुखस्य हेतुत्वेपि क्षयं सुखपं सुखं न भवतीत्याशंक्याह नहीति अत्र

20 अथेहात्रोक्तत्वादि सतरेणेरेषु न स सत्संत्यपमेव मनिभासते न तद्विज्ञाना पयरयवल वार्परशनिमामंतनरहमु अतेसुखं

त्वेव विजिज्ञासितव्यमित्यादि सुखं भगवो विजिज्ञास इति अभिमुखो भूतायाह २२ यो वै भूमा सहन्त्वर निशयं वहि

तिपयाया तत्र सुखं नातो वा कल्प्यातिशयत्वादल्प मतस्मिन्नल्पे सुखं नास्ति अल्पस्याधिकतृष्णाहेतुत्वात्तस्मा

सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवो विजिज्ञास इति २२ यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भू

मा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति २३ यत्र नान्यत्पश्यति नान्यच्छृणोति

च दुःखं नाम दुःखबीजं सुखं दृष्टं न यदि लोके तस्मात्सुखं नाल्पे सुखमस्तीति अतो भूमैव सुखं तस्माद्दुःखबीजत्वात्सं

मवाभूम्न २३ किं लक्षणोसौ भूमेत्याह यत्र यस्मिन्भूम्नि तत्वे नान्यद्द्रष्टव्यमन्येन करणेन द्रष्टान्यो विभक्तो दृश्यान्नपश्य

ति तथा नान्यच्छृणोति ऽऽल्पस्य सुखस्य दुःखत्वान्न भावे सिद्धं फलितमाह अत इति २३ अन्त्यः सविशेषत्वं निर्विशेषत्वं वेति अत्र राम॰

सविशेषनिर्विशेषत्वेन निर्धारयति किमित्यादिना नान्यच्छृणोतीति भूम्नो नित्यसंबंधः ७ ७ ७ २०

किमिति स्पर्शनादिष्वपि समस्पर्शनश्रवणयोरेव निषेध्यत्वेनानुगमहणमित्याशंक्याह नान्येति अनुक्तानां स्पर्शादीनामुप
लक्षणार्थत्वेनात्र दृश्योर्ग्रहणं स्पर्शनाद्यविषयत्वस्यापि भूम्नि भावाहित्याह अन्येषामिति अत्रेति लक्षणवाक्योक्तिस्
त्रे हेतुमाह नापश्यदिति स्मिन्नधिकरणे न त्वविचारणायामन्योन्यत्र पश्यति न शृणोति न मनुते न विजानाति स भूमेति दृष्ट
श्याद्विविकल्पनिषेधेनाध्यासाधिकरणत्वोपलक्षितस्याविकल्पाविषयत्वमेव भूमलक्षणमित्युपसंहरति एवमिति उक्तेन

न मरूपयोरेवान्तर्भावाद्विषयभेदस्य तत्प्राहकयोरेव दर्शनश्रवणयोर्ग्रहणं अन्येषां चोपलक्षणार्थत्वेन मननं त्वत्रो
क्तं दृष्टव्येनान्यन्मनुत इति भाष्ये मननपूर्वकत्वाद्विज्ञानस्य तथा नान्यद्विजानाति एवं लक्षणो यः स भूमा इति म

नान्यद्विजानाति स भूमा ॥

त्रमस्ति द्वान्यद्दर्शनभावो भूम्नस्तु च यत्रेनान्यत्पश्यतो साहिनाश्रयान्तं न पश्यमात्मानं पश्यतीत्येतत् किं चातो यद्यन्यद
र्शनाद्यभावमात्रमित्युच्यतेन हद्वैतसंव्यवहारविलक्षणो भूमेत्युक्तं भवति ऽऽ वलक्षणांस्तु दपित्तुं विमर्शति कि चेति
लोकमस्ति दर्शनादिविषयत्वाभावमात्रं भूम्नो लक्षणं तन्निषेधेन त्वज्ञेयत्वे चेति विमर्शार्थः कस्मिन्नध्यस्ते को लोभः को
वा दोष इति शिष्यः पृच्छति किं चात इति आपमनस्य घनत्र लाभ दर्शयति यदीति अन्यस्य यमासिद्धस्य दर्शनादिविषयत्वं भ
विनास्तीति तेनाव न्याप्तं तत्स्य लक्षणमित्युच्यते चन्स व विकल्पातीतः प्रमाणाज्ञाभूमेत्यन्त मत्ससिद्धिरित्यर्थः ७

२१ 21 द्वितीयपर्यायस्यमवघनसिद्धिदोषं स्पष्टयति अथेत्यादिना तमेवदोषंसम्प्रत्यक्षं स्पष्टयति यथेत्यादिना सतिक्रियाकारकफलभेदप्र-
थ्येसंसारनिवृत्तिरित्याह क्रियेति सतिभेदेक्रियादि संसारश्चेल्लोकदृष्टंतद्वत्सर्वदाऽप्येकस्मिन्नेव क्रियाकारकाभावस्तेन संसारनिवृत्ति-
चोदयति आत्मैकत्वदर्शने एकस्मिन्क्रियादिभेदस्यासंभवं दर्शयन्नुत्तरमाह नात्मदर्शनेति द्वितीयपर्यायस्य दृष्टत्वेऽस्य दोषे प्र-
थमपर्यायस्यापि समानं दृष्टत्वमिति शिष्याशंकायां नेति आद्यपर्यायेऽपि न पश्यतीत्येतावतैवदर्शनाद्यभावलाभाद्यत्रेत्यस्यादिति

अथान्यदर्शनविशेषप्रतिषेधेनात्मानं पश्यतीत्युक्तत्वेन त्वेकस्मिन्नेव क्रियाकारकफलभेदोऽभ्युपगतो भवेत् यथैवं काशे-
षः स्यान्न तत्र यमेव दोषः संसार इति ज्ञातिः क्रियाकारकफलभेदो हि संसार इति आत्मैकत्व एव क्रियाकारकफलभेदः सं-
सारविलयश्च इति चेन्न आत्मनो निर्विशेषत्वाभ्युपगमे दर्शनादि क्रियाकारकफलभेदाभ्युपगमस्य शब्दमात्र-
त्वात् अन्यदर्शनाद्यभावोक्तिः पक्षेऽपि यत्रेत्यन्यत्र पश्यतीति च विशेषणमनर्थकं स्यान्नामिति चेन्न दृश्यते हि लोके यत्र-
अन्ये गृहेऽन्यन्न पश्यतीत्युक्ते स्वं भार्यां नात्मानं च न पश्यतीति गम्यते एवमिहापीति चेन्न ॥ऽ चविशेषणस्य व्यर्थे स्यान्नामि-
मर्थः व्यर्थमेवेदं वचनमित्याशंकाशिष्यः स्वयमेव ज्ञाते दृश्यते हि लोके हि यत्रान्यस्मिन् गृहे नान्यत् पश्यति तद्वदेवहो यमिति
प्रयोगो दृश्यते न च तस्यानेरर्थक्यमिष्ठं व्यवहारांगत्वात् यथा तेधनधान्यादर्शनेऽपि स्वमात्मानं गृहं च न पश्यतीति प्रत्युत स्यानेरर्थ- एम· २१
क्यं न गम्यते किंतु तत्र स्वभार्येणैनात्मनश्च दर्शनेन मिथ्यंतयाद्यत्र नान्यत्पश्यतीत्यत्रापि विशेषणानैरर्थक्यं समाधानं वक्ष्यामि समर्थः

किं विशेषणमनर्थकं त्वानुपपन्ना भूम्नोऽधिकरणाधिकर्तव्यभावः स्वात्मदर्शनं चवाच्यमित्यत्र चाने किंवा भूमस्य गनिर्वक्तव्येति परिहाते चे
न्त्राणं रूपपत्ति ब्रह्मसाहिना तथानत्वमसोतिविदिस्तमर्थः निर्दिष्टीतत्वादधिकरणाधिकर्तव्यभेदानुपपत्तिरिति विशेषणं प्रद्यासन्नरूप
रूपतीति विशेषणाद्आत्मनः स्वदर्शनं वा वाच्यमितितत्राह ब्रह्मदर्शनेति द्वितीयमनूघगानिमाह यत्रेत्यादिना परिहारभागं
द्रस्यांशेनसमरूपति पश्यति एवज्ञस्मिन्नेवभूम्नि पश्चेति विशेषणमनर्थकमपि मुज्जनेभ सिद्धान्तुवादेनाधिकरणादिविक
ल्पनत्वमसोमेकत्वोपदेशादधिकरणाधिकरणाधिकर्तव्यभेदानुपपत्तेः तथास्तद्वैकमेवाद्वितीयंस्वमस्मितिविषये
निर्दिष्टत्वात् भ्रहस्येऽनात्मेनसंदृश्येनिरूपमस्यविज्ञानारमेरके न विजानोपाहि त्यादिश्रुति भूम्नः स्वात्मनि
दर्शनाद्यनुपपत्तेः पत्रेति विशेषणमनर्थकमामिति चेन्नाविद्याकृतभेदापेक्षत्वात् यथास्वमेकत्वाद्वितीय
त्वबुद्धिमत्तामपेक्ष्यसद्वैकमेवाद्वितीयमितिसंख्याद्यनर्हमप्युच्यते एवं भूम्न्येकस्मिन्नेव पश्चेति विशेषणं अ
विद्यावस्थायामन्यदर्शनानुवादेन च भूम्नस्तदभावत्वलक्षणस्य विवक्षितत्वान्नात्र समरूपतीति विविशेषणं न
स्मात्संसारव्यवहारो भूम्नि नास्तीति समुदायार्थः ॥ ८ ॥ त्याविषयत्वलक्षणस्य भूम्नोऽलक्षणस्य विवक्षितत्वादित्याह
स्वमिति यद्यविद्यावस्थमन्यदर्शनादित्यनुवादेन नान्य समरूपतीति विशेषणं च भूम्नि नाविरुध्यते दर्शनाद्यविषयत्व
लक्षणस्य भूम्नोऽलक्षणस्याविवक्षितत्वादित्याह भ्रावि वेति लक्षणत्वाबाध्यं सुपसंहरति तस्मादिति दर्शनादिसक

लसांसारिकव्यवहाराभावोपलक्षितं तत्व भूमेरर्थः ॥

छां॰भा॰टी॰ अथ यत्रेत्यादिवाक्यं व्याकरोति यत्रेति परिच्छिन्नस्याविद्याकालभावित्वं दृष्टान्तेन विवृणोति यत्रेति तत एव परिच्छिन्नत्वा
२२ दित्यपि वचन कथं तदमृतमित्यपेक्षायां तत्र च्छेदप्रयोगस्तत्राह तच्छेदइति भूम्नः सुखत्ववचनात्तस्य चान्त्यत्वं पश्यति न
22 त्वहीति भत्कार्यदृष्टान्तमन्योवस्तुदृष्टा वेत्तिविकल्पाद्यं प्रत्याह स भगवन्निति द्वितीयमनूद्य विनिराकरोति पूर्वापरवि

अथ यत्राविद्याविषये सोऽन्योन्यमन्यत्पश्यतीति तदल्पमविद्याकालभावि स यथा स्वप्नदृष्टं वस्तु आप्रबोधात्तत्का
लभावीति तद्वत्तत एव तन्मर्त्यं विनाशि स्वप्नवस्तुवदेवेत्यादि परो यो भूमा यत्तदमृतं तत्र च्छेदोऽमृतत्वं यः स तस्मिन् सर्वल
क्षणो भूमाह हे भगवन्कस्मिन्प्रतिष्ठित इति स भगवन्निति नारदः प्रत्याह स तु भूमा स्वे महिम्नीति स्वे आत्मीये महिम्नि महात्म्ये
विभूतौ प्रतिष्ठितो भूमा यदि प्रतिष्ठामिच्छसि यदि वा परमार्थमेव पृच्छसि तर्हि न महिम्न्यपि प्रतिष्ठित इति

अथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यं स भगवः कस्मिन्प्रति
ष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायत
नानीति नाहमेवं ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥ भूमोऽप्रतिष्ठितोऽनाश्रितो भूमा कस्य चिद्रपीत्यर्थो यदि
स्वे महिम्नि प्रतिष्ठो भूमा व्यवहारोऽपि महति एव च चालेऽन्यत्सर्गो अश्वादि इह महिमेत्याचक्षते गावश्चाश्वाश्च गोअश्वं द्वन्द्वैकवद्भावः सर्व
त्र गवाश्वादि महिमेति प्रसिद्धं न तु तथा प्रतिष्ठितस्तत्प्रतिष्ठो भवति यथा नाहमेवं स्वतोऽन्यं महिमानमाश्रितो भूमा चैत्र इति
ब्रवीम्यत्र हेतुत्वेन नान्यो ह्यन्यस्मिन्प्रतिष्ठित इत्यव्यवहितेन संबंधः ॥ तेन धर्माशंकापरिहारार्थं स एवाधस्तादिति नाभूम्नः स्वतोऽन्यस्मि

एभ॰
२२

कथं तर्हि प्रतिष्ठित इति भगवानित्याशंक्याह किं चेति २४ अवतारितमेव वाक्यं सत्यपूर्वकमवतार्य व्याचष्टे कस्मादित्यादिना उक्तमेवार्थं

किंत्वेवं ब्रवीमीति नेत्यादिना च स एवेत्यादि २५ कस्मात्पुनः क्वचिन्न प्रतिष्ठितस्तु च्यते यस्मात्स एव भूमाधस्तान्न तद्व्यतिरेकेणान्य

द्वितीये यस्मिन्प्रतिष्ठितः स्यात यथोपरिष्टादित्यादि समानं न तिभूम्नोऽन्यस्ति भूमा हि प्रतिष्ठितः स्यान्न तु तथास्ति स एव तु सर्वम

तस्मात्सौ न क्वचित्प्रतिष्ठितः यत्र नान्यत्पश्यतीत्यधिकारात् अधिकृतभ्यन्तान्निर्दिष्टात्स एवाधस्तादित्यादि च परोक्षनिर्देशा

स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदं सर्वमित्यथातोऽहंकारादेश एवाह

मेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वमित्यथात आत्मादेश एव

त्स एवाधस्तादित्यादि च परोक्षनिर्देशात् द्रष्टुर्जीवादन्यो भूमा स्यादित्याशंका कस्यचिन्मा भूदिति अथातोऽनंतरमहंकार

देशोऽहंकारेण निर्दिश्यत इत्यहंकारादेशः पुनरनन्यत्वदर्शनार्थं भूमैव निर्दिश्यतेऽहंकारेणाहमेवाधस्तादित्यादिना अ

हंकारेण देहादिसंघातोऽप्यादिश्यतेऽविवेकिभिरित्यतस्तदाशंका मा भूदित्यथानंतरं ऽऽ अतिरेक दुर्लक्ष्यचिद्घनोति सतीति अ

हंकारात्मत्वोपदेशस्याभिप्रायमाह पश्यतीति कोऽसावहंकारेणादिश्यते तस्याशंकाप्रयोजनाद्वारपूर्वकमाह दृष्टिरिति अहंका

रस्यार्थाभावादेशस्य तात्पर्यमाह अहंकारेणेति ॥

छां॰भा॰टी॰ अनात्मविज्ञानवतः कृतनात्सूत्रामाह आत्मैवेति एकस्मिन्सजातीयभेदराहित्यस्योक्तेः अस्मिन्नन्यस्मिन्विजातीयभेदमन्यात्व
२३ मुच्यते आत्मक्रीड इत्यादिवाक्यमेहरर्शयति देह मात्रेति क्रीडा वाह्यसाधनेत्यत्र लोकसंमतिमाह लोक इति देहस्य जीवितेनैव भो

23 आत्मैव सर्वं सर्वमिदमेवमेकमजं सर्वतो व्योमवत्पूर्णमन्यशून्यं पश्यन्स वा एष विद्वान्मननविज्ञानाभ्यासात्मरति॥ अन्ये
तु रमणं परस्परसोपमात्मरतिः तथात्मक्रीडो देहमात्रसाधना रतिर्बाह्यसाधना क्रीडा लोके स्त्रीभिः सखिभिश्च क्रीडनादिद
र्शनात् न तथा विदुषः किं तर्ह्यात्मविज्ञाननिमित्तमेवोभयमपि भवतीत्यर्थः । मिथुनं द्वन्द्वजनितं सुखं तदपि निरपेक्षं परस्य विदुषस्ति

आत्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति स वा एष ए
वं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति तस्य सर्वेषु लोकेषु का
मचारो भवति॥ आत्मानन्दः शब्दादिनिमित्तः आनन्दो ह्यविदुषां न तथास्य विदुषः किं तर्ह्यात्मनिमित्तमेव सर्वं सर्वदा स
र्वप्रकारेण च देहजीवितमात्रभोगादिनिमित्तबाह्यवस्तुनिरपेक्षस्य सर्वदा एवं लक्षणो विद्वान्जीवन्नेव स्वाराज्येऽभिषिक्तः पतितेऽपि
देहे स्वराडेव भवति यत एवं भवति ततः तस्य सर्वेषु लोकेषु कामचारो भवति॥ गन्धाद्यपेक्षानिमित्तं बाह्यवस्तु तत्र सर्वत्र निरपेक्षो रामः
यदप्यतो भेष्वसंगवर्तिनो विद्वानित्याह देहेति जीवन्मुक्तिमुक्त्वा विदेहमुक्तिं दर्शयति स इति स्वाराज्यनिमित्तो ह्यस्य फलीनरमाह २३

स्वाराज्यं सर्वलोककामचारोप्त्यसपेमाह आत्मानिति यावन्तो भोगतन्त्रास्य यथा कामचारो भवतो ऽस्माहिना परिछिन्नं पुरलं
त्वच पूर्वं भूमिषु फलमुक्तमचनु परमानं हमातोमरच्यु हानिर च्यनेनतु सोपाधिकं रूपमित्यर्थः फलमहर्शन हा रेणास्तुत्वावि

आत्मानिषु पूर्वं भूमिषु तत्रासेतितावन्मात्रपरिछिन्नकामचारित्वमुक्तमन्यराजत्वं चार्थप्रासंसातिशयत्वाद्यथा ग्रामस्वाए
ज्यो कामचारत्वानुवाद इनततन्निहिताति रिहो ऽप्यतेसत्वराोऽस्माहिना अथय नर्पैन्मयाऽन उक्त दर्शनाहन्यथावेपरिसेनप्यो
तमेव वासम्पन्न विहस्तेन्यराजानो भवंति अन्नः परोज्यास्वामोऽयं यातेन्यराजानः नैकिंच स्यप्तलोकाः सप्तलोकाएषां

अथयेन्यथातो विद्वन्यराजानस्ते सप्तलोका भवंतितेषां सर्वेषु लोकेषु कामचारो भवति २४

ते सप्तलोकाः भेरदर्शनस्याश्वविषत्वाहस्मं चतन्मत्समित्यवोचाम तस्माये ह्यैमहर्शिनस्ते सप्तलोकाः स्वदर्शनानुरूप्ये
णैव भवंत्यतरावतेषां सर्वेषु लोकेषु कामचारो भवति २५

धामविद्वन्निंद्राद्वारोपतांस्तौति अथयेसाहिना तेसप्तलोका भवंतीति संवंधभेदर्शिना विनाशिफलवत्वे हेतुमाह भेददर्श
नस्येति परिछिन्नस्यविनाशित्ववचनं तस्माहिनिपरामर्शनि २५ छ छ छ छ

छां॰ भा॰ टी॰ ७ उक्तविद्यात्कृत्स्नमर्थमेव विदुषः स्वप्रत्यक्षमाह तस्येति तथाविदुषः स्वप्रत्यक्षव्यवहारविशिष्टमर्थः कोऽसावितरस्तो व्यवहारः न केवलं प्राप्त
२१ णोऽत्ममिह विद्याफलं किं तु मंत्रोक्तं च माह किं चेति तदेतदर्थः समस्यानिर्दिश्येति स च विद्याफलस्तरः न पश्य इति मंत्रमाहात्म्यपद्या

24 तस्य ह वा एतस्येत्यादि स्वारस्ये मास्तस्य महत्त्वं तस्य विदुषः स्वर्ग्यः आकाशात्मवित्तात्मस्वात्मनोऽन्यस्मात् सर्वं आत्मतः प्राणादिर्नामां
तस्येत्यतिमन्त्र्यावभूतां सहात्मवित्तात्मतां सतोऽहं तैनी रवात्मन एव संहतौ तन्नयासर्वोऽप्यन्यो व्यवहारः आत्मत एव विदुषः

तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मत आकाश आत्म
तस्तेज आत्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमात्मतो ध्यानमात्मत
श्चित्तमात्मतः संकल्प आत्मतो मन आत्मतो वागात्मतो नामात्मतो मंत्रा आत्मतः कर्माण्यात्मत एवेदं सर्वमिति तदे
ष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वश इति ॥ ॥

॥२॥ किं च तदेतास्मिन्नर्थे एष श्लोको मंत्रोऽपि भवति न पश्यः पश्यतीति पश्यो यथोक्तदर्शी विद्वानित्यर्थः मृत्युं मरणं रोगं ज्वरादि दुः एकः
खतां दुःखभावं चापि न पश्यति सर्वं ह सर्वमेव स पश्यः पश्यत्यात्मानमेव सर्वं ततः सर्वमाप्नोति सर्वशः सर्वप्रकारैरिति ॥ २४
च षेऽपश्यतो मोऽरेनास्वर्वमाप्नोतीति पूर्णतापरिच्छेदभ्रमस्यावर्जनेन विवक्षिता न तु क्रियाकारकादिभावोऽपुरुषार्थत्वप्रसंगा
दिति द्रष्टव्यं ॥ ४ ॥

विद्यात्वं निपीय कृतार्थस्य गुणो विद्याफलमपि निर्गुणत्वमस्ति विद्यामेतीत्याह किंचेति त्रिधा तेजोबन्नरूपेण शब्दस्पर्शादि
हिरण्यार्थः विद्यां तत्फलं तत्र पेस्मितां त्यक्तानि वाभिधायाहारशुद्धाविति याहेत्स्तात्पर्यमाह अथेति एतद्देव विमुक्तो स्त विषया
किंच स विद्वान्सर्वात्मा एष भूमेदादेकधैव भवत्येकधैव च सन्त्रिधादिभिर्भेदैरनंतभेदभिन्नो भवति सृष्टिकाले पुनः
संहारकाले पुनरेकधैव पारमार्थिकमेकधा भावं प्रतिपद्यते स्वतंत्र एवं इति विद्याफलेन भणितेन पुनः स्तौति अथेत्या
नीपयोक्तापि विद्यायाः सम्यगवभासकारणमुक्तावभासकारणस्य वाहारशुद्धिः सत्त्वविशुद्धिकारणं साधनमुपदिश्य

स एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधा चैव पुनश्चैकाद
शःस्मृतः शतं च दश चैकश्च सहस्राणि च विंशतिराहारशुद्धौ ॥०॥

तेष्वाहारशुद्धौ आहियत इत्याहारः शब्दादिविषयज्ञानं भोक्तुर्भोगायाहियते तस्य विषयोपलब्धिलक्षणस्य वि
ज्ञानस्य शुद्धिराहारशुद्धिः रागद्वेषमोहदोषैरसंस्पृष्टं विषयविज्ञानमित्यर्थः ऽऽ निदिध्यासनादि स्मृतिमात्रस्याप
रशब्देनाकरोति आहियत इति कथं तस्याहियमाणत्वं तत्राह भोक्तुरिति किं दर्शनस्य शुद्धिः स्यात् तत्राह रागेति॥

छां॰भा॰टी॰ आहारशुद्धिफलमाह तस्मिन्निति अंतःकरणशुद्धिफलं कथयति सर्वेति स्मृतिलाभफलं दर्शयति तस्यां चेति भवतीत्याहारस्य
२५ तस्यामाहारशुद्धौ सत्वशुद्धौ तदंतःकरणस्य सत्वस्य शुद्धिर्नैर्मल्यं भवति सत्वशुद्धौ च सत्यां यथावगते भूमात्मनि ध्रुवाऽवि
25 छिन्ना स्मृतिरविस्मरणं भवति तस्यां च लब्धायां स्मृतिलंभे सति सर्वेषामविद्याकृतानर्थपाशरूपाणामनेकजन्मांतरा
नुभवभावनाकठिनीकृतानां हृदयाश्रयाणां ग्रंथीनां विप्रमोक्षो विशेषेण प्रमोक्षणं विनाशो भवतीति यत एतदुत्तरो
त्तरं यथोक्तमाहारशुद्धिमूलं तस्मात्सा कार्येत्यर्थः सर्वं शास्त्रार्थमशेषत उक्त्वाख्यायिकामुपसंहरति तस्मै मृदि

सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्षस्त
स्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः २ ॥

तकषायायेत्यादिना वार्त्तादिरिव कषायो रागद्वेषादिदोषः सत्वस्य रंजनारूपत्वात्स ज्ञानवैराग्याभ्यासरूपक्षालेन क्षालितो मृ
दितो विनाशितो यस्य नारदस्य तस्मै योग्याय मृदितकषायाय तमसोऽविद्यालक्षणात्परं परमार्थतत्वं दर्शयति दर्शि
तवानित्यर्थः कोऽसौ भगवानुत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं च वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति सेवंभूतः सनत्कुमारः राम:
ह्रिदेवास्मिन्नतिशेषः मल्लनबीकामानस्यं समुपसंहरति यत्रद्विति तस्मै मृदितकषायायेत्यादिवाक्यमवतार्य्य आचष्टे सर्वमिति श्री २५

छां॰ भा॰ टी॰ तस्य चैवं शिष्यां नरमाह तमेवेति २६ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानंदपूज्यपादशिष्यभगवदानंदकृता
२६ तमेव सनत्कुमारं देवं स्कंदं इत्याचक्षते इति कथयतीति द्विरोद्विर्वचनमध्यायपरिसमाप्त्यर्थम् २६ इति श्रीगोविंद
26

तं स्कंद इत्याचक्षतेनेन तं स्कंद इत्याचक्षते २६
इति श्रीसप्तमः प्रपाठकः समाप्तः ॥ ७ ॥

भगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ छांदोग्योपनिषद्विवरणे सप्त
मः प्रपाठकः समाप्तः ॥ ७ ॥

नगिरिकृतायां छांदोग्यभाष्यटीकायां सप्तमोऽध्यायः समाप्तः ॥ ७ ॥ श्रीएकदंतायनमः श्रीगणेशायनमः एम:
छ छ छ छ छ छ छ छ छ छ छ २६



छान्दोग्यसमाप्तः